# শ্রীশিব আরতী

{॥ শ্রীশিব আরতী ॥}

সর্বেশং পরমেশং শ্রীপার্বতীশং বন্দেঽহং বিশ্বেশং শ্রীপন্নগেশম্ ।
শ্রীসাম্বং শম্ভুং শিবং ত্রৈলোক্যপূজ্যং বন্দেঽহং ত্রৈনেত্রং শ্রীকংঠমীশম্ ॥ ১॥

ভস্মাম্বরধরমীশং সুরপারিজাতং বিল্বার্চিতপদযুগলং সোমং সোমেশম্ ।
জগদালযপরিশোভিতদেবং পরমাত্মং বন্দেঽহং শিবশঙ্করমীশং দেবেশম্ ॥ ২॥

কৈলাসপ্রিযবাসং করুণাকরমীশং কাত্যাযনীবিলসিতপ্রিযবামভাগম্ ।
প্রণবার্চিতমাত্মার্চিতং সংসেবিতরূপং বন্দেঽহং শিবশঙ্করমীশং দেবেশম্ ॥ ৩॥

মন্মথনিজমদদহনং দাক্ষাযনীশং নির্গুণগুণসংভরিতং কৈবল্যপুরুষম্ ।
ভক্তানুগ্রহবিগ্রহমানন্দজৈকং বন্দেঽহং শিবশঙ্করমীশং দেবেশম্ ॥ ৪॥

সুরগংগাসম্প্লাবিতপাবননিজশিখরং সমভূষিতশশিবিম্বং জটাধরং দেবম্ ।
নিরতোজ্জ্বলদাবানলনযনফালভাগং বন্দেঽহং শিবশঙ্করমীশং দেবেশম্ ॥ ৫॥

শশিসূর্যনেত্রদ্বযমারাধ্যপুরুষং সুরকিন্নরপন্নগমযমীশং সংকাশম্ ।
শরবণভবসম্পূজিতনিজপাদপদ্মং বন্দেঽহং শিবশঙ্করমীশং দেবেশম্ ॥ ৬॥

শ্রীশৈলপুরবাসং ঈশং মল্লীশং শ্রীকালহস্তীশং স্বর্ণমুখীবাসম্ ।

কাঞ্চীপুরমীশং শ্রীকামাক্ষীতেজং বন্দেঽহং শিবশঙ্করমীশং দেবেশম্ ॥ ৭॥

ত্রিপুরান্তকমীশং অরুণাচলেশং দক্ষিণামূর্তিং গুরুং লোকপূজ্যম্ ।

চিদম্বরপুরবাসং পঞ্চলিংগমূর্তিং বন্দেঽহং শিবশঙ্করমীশং দেবেশম্ ॥ ৮॥

জ্যোতির্ময়শুভলিংগং সঙ্খ্যাত্রয়নাট্যং ত্রয়ীবেদ্যমাদ্যং পঞ্চাননমীশম্ ।

বেদাদ্ভুতগাত্রং বেদার্ণবজনিতং বেদাগ্রং বিশ্বাগ্রং শ্রীবিশ্বনাথম্ ॥ ৯॥

Encoded by Shailendra Sharma

Proofread support by Avinash Sathaye and Sunder Hattangadi

Please send corrections to sanskrit@cheerful.com

Last updated ত্oday

http://sanskritdocuments.org

Shiva Arati Lyrics in Bengali PDF
% File name : shivAratI.itx
% Category : AratI
% Location : doc_shiva
% Language : Sanskrit
% Subject : Hinduism/religion/traditional
% Transliterated by : Shailendra Sharma
% Proofread by : Shailendra Sharma, Avinash Sathaye sohum at ms.uky.edu, Sunder Hattangadi
% Latest update : December 23, 2007
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org

%
% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [ October 12, 2015 ] at Stotram Website